International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 108-111
© 2026 IJMH
www.themultijournal.com
Received: 18-05-2026
Accepted: 13-06-2026
Publish : 15-06-2026

**Mrs. Lelima Padhan**
PhD Scholar, N.S.U.,
TIRUPATI

**Correspondence:**
**Mrs. Lelima Padhan**
PhD Scholar, N.S.U.,
TIRUPATI

# संस्कृते साहित्यज्ञानपरम्परायां महाकविकालिदासस्य भूमिका

**Mrs. Lelima Padhan**

**शोधसंक्षिप्तिका**

संस्कृतज्ञानसमुद्रस्य अमूल्यरत्नं भवति महाकविकालिदासः। काल्या: दासः कालिदासः सरस्वत्याः साक्षादवतारत्वेन संस्कृतजगति प्रसिद्धिमाप्नोति। सः न केवलं संस्कृतवाङ्मये अपितु समग्रविश्वे स्व प्रतिभा बलेन विश्वकवित्वेन अभिधीयते। राजाविक्रमादित्यस्य नवरत्नेषु अन्यतमः कुलगुरूकालिदासः स्वीय अम्लानप्रतिभाया: प्रदर्शनेन, गभीरपाण्डित्यस्य प्रकाशनेन, चमत्कारकाव्यकौशलस्य प्रयोगेण साहित्यजगति अद्वितीय कवित्वेन सुविख्यातमासीत् । अतः कथ्यते,

**"कनिष्ठिकाधिष्ठित कालिदासः इति ।"**

महाकविकालिदासः स्वीय ज्ञानकोशलस्य प्रयोगेण साहित्यक्षेत्रमत्यन्तं सुदृढं क्रियते । सः महाकाव्य-खण्डकाव्य-नाटकादि प्रत्येकेषु क्षेत्रेषु स्व प्रतिभायाः अद्भूतप्रदर्शनं क्रियते। साहित्यस्य भाव-कला उभयोः पक्षयोः विचक्षणतया स्वरुप प्रतिपादने सः सिद्धहस्तः । तस्य सर्वासु कृतिषु साहित्यिकवैशिष्ट्यं बहुलमात्रायां दृष्टिगोचराणि सन्ति। तद्यथा, रस संयोजने परिपक्कता, चरित्रचित्रणे सजीवता, प्रकृतिचित्रणे चमत्कारिता, भाषानुयायी वर्णनक्षमता, अलंकारप्रयोगे विचक्षणता इति । साहित्यस्य प्रत्येकं विभावं कवेः कृतिषु उपलभ्यते ।

संस्कृतज्ञानपरम्परायां महाकवेः महती अवदानं विद्यते । साहित्य-भूगोल-राजनीति-ज्योतिष-संगीत-धार्मिक-नैतिक-सौन्दर्यादि शास्त्रेषु तस्य विशेष ज्ञानमासीत् । अतः तस्य आनुभविकज्ञानं तथा वैदुष्यस्य प्रकाशनेन महाकविकालिदासः संस्कृतसाहित्यभण्डारं परिपूर्णं क्रियते । पाठकसमाजमपि महाकवे: प्रदत्तं ज्ञानेन उद्वुद्धासमृद्धाश्च भवन्ति ।

**कुञ्चिका शब्दाः**
१. साहित्यम्
२. ज्ञानपरम्परा
३. महाकविकालिदासः
४. कथावस्तुः
4. चरित्रम्
६. रस:
५. प्रकृतिः
८. अलंकार:
९. भाषाशैली
१०. वैशिष्ट्यम्

**उपोद्घातः**

**"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु ।**
**प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ।।"[1]**

सारस्वतसंस्कृतसाहित्ये सरस्वत्याः साक्षादवतारः महाकविकालि-दासः मूर्धन्यस्थानमावहति। सः न केवलं संस्कृतवाङ्मये अपितु समग्रभारतवर्षे स्व प्रतिभाबलेन विश्वकवित्वेन अभिधीयते। राजा-विक्रमादित्यस्य नवरत्नेषु अन्यतमः महकविकालिदासः स्वीय काव्यकृतिः माध्यमेन साहित्यिकज्ञान-

भण्डारं परिपुष्टं क्रियते इति, अत्र नास्ति सन्देहः। कवेः साहित्यिककलाकौशलस्य प्रयोगं सहृदयानां हृदयमाह्लादयति। अतः कथ्यते,

**" कनिष्ठिकाधिष्ठित कालिदासः ।"**

सः महाकाव्य-स्वण्डकाव्य-नाटकादि प्रत्येकेषु क्षेत्रेषु स्व प्रतिभायाः अद्भूत प्रदर्शनं क्रियते । साहित्यस्य कलाभाव-उभयोः पक्षयोः विचक्षणतया स्वरूप प्रतिपादने सः सिद्धहस्तः। कविशिरोमणिकालिदासस्य सप्तैव कृतयः सन्ति । यथा हि, रघुवंशं-कुमारसम्भवमेते महाकाव्यद्वयं, मेघदूतं-ऋतुसंहारमेते खण्डकाव्यद्वयं, अभिज्ञानशाकुन्तलं, मालविकाग्निमित्रं तथा विक्रमोर्वशीयमेतानि नाटकत्रयम् । तस्य प्रत्येकेषु काव्येषु बहूनि वैशिष्ट्यानि परिदृश्यते । तद्यथा, रस संयोजने परिपक्वता, चरित्र चित्रणे सजीवता, प्रकृतेः जीवन्तचित्रणं, सहज स्वभाव भाषागुणानुयायी वर्णनक्षमता, उपमादि अलंकाराणां संयोजनं तथा साहित्यिक कलाकौशलस्य विचक्षणता इति । यानि कवेः गभीरपाण्डित्यं प्रकाश्यते ।

विश्वकवि कुलगुरु वा विविधशास्त्राणामधिकारी वर्तते। साहित्य-राजनीति- ज्योतिष- संगीत-भौगोलिकादि प्रत्येकेषु क्षेत्रेषु तस्य सुगभीरज्ञानं वर्तते । अतः सः तस्य ग्रन्थानां वर्णने स्वीय ज्ञानस्य प्रकाशनं पूर्वकं पाठक समाजं उद्बूद्धं क्रियते। तस्य साहित्यिक-कलाकौशलस्य प्रदर्शनेन सः विद्वत्परिषदि आदरणीयं भवितुमर्हति ।

**महाकविकालिदासस्य साहित्यिक वैशिष्ट्यम्**

कवि-शिरोमणिकालिदासः स्व अद्भूतप्रतिभा, विचक्षणज्ञान-कौशलस्य वा प्रयोगेण साहित्यक्षेत्रमतीव सुदृढं क्रियते। कवेः कृतीनामनुशीलनात् तस्य कृतिषु बहवः वैशिष्ट्यानि सन्ति इति ज्ञायते। यथा हि, श्रृङ्गाररसस्थ परिपुष्टता, सजीवतया चरित्रचित्रणं, सरसकथावस्तोः संयोजनं, मनोरमप्रकृतिचित्रणम्, उपमाअलंकारस्य सुमधुरप्रयोगं, वैदर्भीरीतेः प्रयोगं, प्रसादगुणस्य प्रकाशनं, विचक्षणवर्णनकौशल-मित्यादिनी। तषामुपरि अधः सम्यक्तया आलोचना क्रियते,

**क) वस्तुसंयोजनम् -**

काव्यस्य चमत्कारिता कथावस्तोमुपरि आश्रियते । सरसकथावस्तोः प्रकाशनेन कविः विद्वतसमाजे आदरणीयं भवितुमर्हति। कुलगुरू-कालिदासः तस्य कृतिषु विख्यातं पौराणिकं वा कथावस्तोः संयोजनं क्रियते । यद्द्वारा सः पाठकसमाजस्य मानवसमाजस्य च महदुपकारं कृत्वा तस्मै पूर्वभिमुखिः कर्त्तुं चेष्टीयते। अभिज्ञानशाकुन्तले रूपके पद्मपुराणाश्रितं कथावस्तुः, रामायणाश्रितं रघुवशं, ब्रह्मवैवर्त-पुराणाश्रितं मेघदूतमित्यादयः काव्यादिगतं वृत्तं तस्योदाहरणं वर्तते ।

**(ख) रसविधानम् -**

काव्यस्यात्मभूतं रसम् । रसयुक्तं भवति चेत् काव्यं हृदयाकर्षणं कर्तुं समर्थः अस्ति। अतः काव्यविधाने मुख्यतत्वं रसस्य विधान कविना प्रथाकू तस्य कृतीना सर्वोपरि क्रियते। श्रङ्गीरच उभयोः रसूयो प्रमुखता कवेः रचनायामुपलभ्यते। अन्यापि रसाः उभयोः रसयो सहायका कान्ते। याः गौणतया कविना श्व ग्रन्येषु संयोज्यते। अभिज्ञानशाकुन्तले नाटके श्रङ्गारसस्य परिपक्वता पूर्णतया परिलक्ष्यते । तस्य दृष्टान्तं यत्,

**"चलापाङ्गां दृष्टिं स्पृशसि वहुशो वेपथुमतीम्**
**रहस्यास्थायीव स्वनसि मृदुकर्णान्तिकचरः ।**
**करौ व्याधुन्वत्याः पिवशसि रति सर्वस्वमधरम्**
**वयं तत्वान्वेषान् मधुर ! हताः त्वं खलुकृती ॥"**[2]

रामकथाश्रितरघुवशं महाकाव्ये राजा दिलीपस्य पराक्रम-वर्णनप्रसङ्गे वीररसस्य अद्भूतवर्णनं कविना क्रियते,

**"सर्वातिरिक्तसारेण सर्वतेजोभिभाविना ।**
**स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ।।"**[3]

**(ग) पात्रसंयोजनम् -**

कविशिरोमणि-कालिदासेन चरित्राणां चित्रणं जीवन्ततथा क्रियते । न केवलं मुख्य पात्राणामपितु गौण चरित्राण्यपि सः उत्कृष्टतया स्वीय काव्ये संयोजनं क्रियते । रघुवंश महाकाव्यस्य अन्येक नायकः भवति दीलिपः । सः धीरोदात्तनायकत्वेन ग्रन्ये अस्विन स्वीकृतः । आदर्श चरित्रत्वेन कविना दीलिपस्य चरित्रं चित्रितम् । यथा हि

**"ज्ञाने मौनं क्षमा शक्तौ व्यागे क्ष्लाघाविपर्ययः ।**
**गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ।।"**[4]

तथैव अभिज्ञानशाकुन्तलं नाटके नायिकाशकुन्तला आदर्शचरित्रतया चित्रिता । सा आदर्शपुत्री, आदर्शसखि, आदर्शपत्नी, सत् क्रियायाः अवतारिणीतया नाटके वर्णिता। मुख्यचरित्राणां गौणचरित्रा-पामुभयोः वर्णन कविना जीवन्तत्वेन क्रियते । अभिज्ञानशाकुन्तले ऋषिकब्व इति चरित्रस्स शकुन्तलायाः पालिता पिता भूमिकायां चमत्कार वर्णना विद्दते। शकुन्तलायाः पतिगृहगमनबेलायां पिता कण्वस्य उपदेशाः महत्वपूर्णं सर्वोपयोगी च वर्तते, तस्योदाहरणं वर्तते,

**"शुश्रूषस्व गुरुन्कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तृविप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।**
**भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ।।"**[5]

**घ) प्रकृतिचित्रणम् -**

विश्वकविना प्रकृतेरुभयोः पक्षयोः वाह्यराभ्यन्तरश्च मनोरमतया चित्रणं क्रियते। सूक्ष्मतायाः निरीक्षणं पूर्वकं सः प्रकृतिवर्णने विविधता प्रदर्श्यते। तस्य प्रकृतिः प्रतिभासंयुक्तं भूत्वा विज्ञानसम्मतापि अस्ति। कुमारसम्भवमहाकाव्यस्य प्रथमसर्गस्य प्रथमश्लोके हिमालयगिरेः भव्यवर्णनं दृश्यते यत्,

**"अस्त्युत्तरस्यां दिशि देवतात्मा**
**हिमालयो नाम नगाधिराजः ।**

**पूर्वापरौ तोयनिधी वगाह्य**

**स्थितः पृथिव्या इव मानदण्ड: ।।"6**

शाकुन्तलेश्च शकुन्तलायाः शरीरशोभा प्रकृतेर्साकं तुलयित्वा अन्तः प्रकृतेरुदाहरणं प्रदीयते यत्,

**"अधर: किशलयरागः कोमल विटपानुकारिणौ बाहू ।**

**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ।।"7**

तथैव मेघदूतेऽपि यक्षेण मेघाय मार्गवर्णनामवसरे प्रकृतेर्प्रत्येकैः विभावैः सूक्ष्मतया वर्णना क्रियते । तस्मात् उदाहरणमेकं द्रष्टुं शक्यते यत् ,

**"नीपं दृष्ट्वा हरितकपिशं कैसरैरर्धरुढै**

**राविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम् ।**

**जग्ध्वारण्येष्वधिकसुरभि गन्धमाघ्राय चोर्व्या:**

**सारङ्गस्ते जललवमुचः सुचयिष्यन्ति मार्गम् ।।"8**

**(ङ) अलंकार विधानम् -**

कवे: कृतीनामनुशीलनात् ज्ञायते यत् महाकविकालिदासः तस्य कृत्यां वहु विधमलंकाराणां प्रयोगं क्रियते। उपमा-उप्रेक्षा-विरोधाभास-रूपक-अनुप्रास-अर्थान्तिरन्यासादे: बहु अलंकाराणि काव्यस्य शोभावर्धनार्थं कविना प्रयोजितानि सन्ति। परन्तु विशेषतः उपमानां प्रयोग: लोकोत्तरान्ददायकाः भवन्ति । यतः समालोचकाः पशंस्यन्ते,

**"उपमा कालिदासस्य ।"**

रघुवंशमहाकाव्ये इन्दुमत्याः स्वयंम्वरावसरे पतिंवरायाः इन्दुमत्याः उपमा महाकविना सञ्चारिणी दीपशिखा सह प्रदत्ता । अनया उपमया सह दीपशिखा कालिदासः इति प्रसिद्धिमाप्नोति । यथा हि,

**"सञ्चारिणी दीपशिखेव रात्रौ यं यं**

**व्यतीयाय पतिंवरा सा ।**

**नरेन्द्रमार्गाट्ट इव प्रपेदे**

**विवर्णभावं स स भूमिपाल: ।।"9**

**(घ) भाषाशैली -**

महाकविकालिदासस्य भाषा सरल-सुबोध्य-सुगम्यं-प्रसादगुणैः परिपूर्णं वर्तते। अस्याः शैल्यां भाषासौष्ठवस्य मनोरमं भावाभिव्यक्तिः, अलंकाराणां विन्यासः, रसस्य परिपक्वता दृष्टिपथमवरोहणं करोति। कविश्रेष्ठः वैदर्भी शैल्यां व्यञ्जनाशक्त्या सरलभाषया अभिव्यनक्ति।

**(छ) भौगोलिकज्ञान वितरणम् -**

स्वानुभूतिः विचक्षणप्रतिभायाश्च प्रकाशनेन कविकालिदासः मुख्यतः मेघदूते गौणरूपेण अन्यान्यो ग्रन्येऽपि स्वं भौगोलिकज्ञानं प्रदर्श्यते । तस्य ग्रन्थेषु विविधाः प्रदेशानां, स्थानानां च अपूर्व-जीवन्तचित्रं प्रदत्ता । मेघदूतस्य एकस्य श्लोकस्य उद्धरणं क्रियते अत्र,

**"वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**

**सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः ।**

**विद्युदामस्फुरितचकितैस्तत्र पौरङ्गनानां**

**लोलापाङ्गैर्यदि न रमते लोचनैर्वञ्चितोऽसि ॥"10**

**(ज) ज्योतिषसंगीतादि ज्ञानप्रदानम् -**

स्व ग्रन्येषु राजनीतिक-धार्मिक-नैतिक-ज्योतिष-संगीतादि सकलज्ञानस्य परिस्फुटनं कृत्वा महाकविकालिदासः भारतीय ज्ञानभण्डारं परिपूर्णं करोति जनकल्याणं च साधयति ।

**उपसंहारः**

संस्कृतकाव्यपरम्परायां चिरवन्दनीय-विश्वकविकालिदासः स्वकीय विचक्षणप्रतिभा,उदात्तचिन्ताधारा, अलौकिककवित्वं, चमत्कारशब्द-विन्यासः, सुबोध्य भाषाज्ञानं, चमत्कार अलंकार सन्निविशः, मनोहर रचनाशैल्याः प्रकाशनेन स्व ग्रन्येषु बहुविधं शास्त्रसम्बन्धीनः सामाजसम्बन्धीनः लौकिकं वा ज्ञानं प्रदाय विद्वत्परिषदि प्रख्यातं भवितुमर्हति । कालिदासः प्राचीनभारतस्य महाकविः नाटककारः च मन्यते। तस्य कृतयः भारतीयसाहित्यस्य समृद्धिं कृतवन्तः। कालिदासस्य कृतीषु सङ्गीतस्य, अलंकारस्य, उपमायाः च बहुप्रयोगः कृतः अस्ति। कालिदासस्य कृतयः भारतीयसंस्कृतौ महतीयोगदानं क्रियते ।

कालिदास के साहित्यिक योगदानं यथा, श्रङ्गररसः कालिदासस्य ग्रन्थेषु सुवर्णितः अस्ति। कालिदासस्य कृतिषु प्रकृतेः, मानवभावनानां च उत्तमं चित्रणं दृश्यते । कालिदासस्य कृतीषु आदर्शपरम्परा नैतिकमूल्यानि च मनसि स्थापितानि सन्ति। कालिदासस्य ग्रन्थेषु उपमानां, उपमानां च बहुप्रयोगः कृतः अस्ति। कालिदासस्य कृतीषु अल्पशब्देषु अधिकाः भावाः व्यक्ताः सन्ति। कालिदासस्य कृतीनां सङ्गीतं महत्त्वपूर्णं भागं जातम्। कालिदासस्य कृतिषु ऋतुः व्याख्याता अस्ति। कविशिरोमणि सरस्वत्यावरदपूत्रकलिदासः न केवलं संस्कृतसाहित्ये अपितु विश्ववाङ्मये स्व साहित्यिककला-कौशलस्य प्रयोगवलेन श्रेष्ठस्थानस्य अधिकरी भवितुमर्हति। महाकविकालिदासस्य प्रतिभायाः प्रशंसायां विश्वकविरविन्द्रनाथोऽपि उक्तवान् ,

**" हे कविन्द्र कालिदास, कल्पकुञ्जवने ।**

**निभृते वसिया आच्छ प्रेयसीर सने ।।"**

**सन्दर्भग्रन्यसूची**

१.गुप्ता डॉ. पुष्पा (१९९४), संस्कृत साहित्यका विशद इतिहास, इष्टर्न बुक प्रिन्टर्स

२. शतपथी डॉ. हरेकृष्ण, संस्कृत साहित्य र इतिहास, किताव महल

३. शर्मा. डॉ. उमाशङ्कार (ऋषि), संस्कृत साहित्य का इतिहास, चौखम्भा भारती अकादमी, वाराणसी २२१००१

४.उपाध्याय पं. बलदेव, संस्कृत साहित्य का इतिहास, हिन्दू विश्वविद्यालय, कशि

५.त्रिपाठी डॉ. श्रीकृष्णमणि, रघुवंशम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी

६. शास्त्री पं. बैद्यनाथ झा, रघुवंशमहाकाव्यम्, चौखम्बा अमरभारती प्रकाशन, वाराणसी

७.शास्त्री डॉ. दयाशंकर, मेघदूतम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी

८.ओझरकर गोविन्द, ऋतुसंहार काव्य, भारतीय विद्याभवन, कुलपति मुन्शी मार्ग, मुम्बई - 400007

९.शास्त्री श्री नवकिशोरकरः (संस्कृत व्याख्याकार:) पाण्डेय: श्री रामतेज(हिन्दी व्याख्याकार), शास्त्री श्री कान्तानाथ (समीक्षा, टिप्पणी लेखक), अभिज्ञानशाकुन्तलम् ,चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1,1975

१०. शतपथी डॉ. हरेकृष्ण, सामन्तराय शारदा, अभिज्ञानशाकुन्तलम्, किताव महल, कलेज स्कोयार, कटक, ७५३००३

११. शास्त्री पण्डित रामतेज (हिन्दी व्याख्याकार), त्रिपाठी ब्रह्मानन्द (सम्पादक), कालिदासग्रन्थावली, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 221001

१२. भट्ट राघव, अभिज्ञानशाकुन्तलम्, निर्णयसागर प्रेस, मुंबई - २

१३.पाण्डेय: प. परमेश्वरदीन:, कुमारसम्भवम्, चौखम्बा कुष्णदास अकादमी, वाराणसी

१४.त्रिपठी डॉ श्रीकृष्णमणि, कुमारसम्भवम्, चौखम्बा सुरभारती प्रकाशन वाराणसी

१५.पाण्डेयः पं परमेश्वरदीन एवं पाण्डेयः श्री अवनिकुमारः, विक्रमोर्वशीयम् चौखम्बा सुरभारती प्रकाशनम्

१६.पाण्डेय: डॉ. रमाशंकरः, मालविकाग्निमित्रम्, चौखम्बा सुरभारती प्रकाशनम्।

**पाद टिप्पणी**

[1] हर्षचरितम् . २. २६

[2] अभिज्ञानशाकुन्तलम् - १.२२

[3] रघुवंशम् - १.२४

[4] रघुवंशम् - २.२२

[5] अभिमानशाकुन्तलम. ४.२०

[6] कुमारसम्भवम-२.२.

[7] अभिज्ञानशाकुन्तलम्. २.२९

[8] मेघदूतम्.पू. २२

[9] रघुवंशम्. ६.६७

[10] मेघदूतम्.पू. २८